**Sri Sathya Sai Books and Publications Trust,**
**Prasanthi Nilayam.**

# श्री रुद्रम्

## 4th Anuvaka

नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो
nama āvyādhinībhyo vividhyantībhyaśca vo namo

नम उगणाभ्यस्तृगंहतीभ्यश्च वो नमो
nama ugaṇābhyastṛgṁhatībhyaśca vo namo

नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो
namo gṛtsebhyo gṛtsapatibhyaśca vo namo

नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो
namo vrātebhyo vrātapatibhyaśca vo namo

नमो गणेभ्यो गणपतिभ्यश्च वो नमो
namo gaṇebhyo gaṇapatibhyaśca vo namo

नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो
namo virūpebhyo viśvarūpebhyaśca vo namo

नमो महद्भ्यः, क्षुल्लकेभ्यश्च वो नमो
namo mahadbhyaḥ , kṣullakebhyaśca vo namo

नमो रथिभ्योऽरथेभ्यश्च वो नमो
namo rathibhyo'rathebhyaśca vo namo

नमो रथेभ्यो रथपतिभ्यश्च वो नमो

namo rathebhyo rathapatibhyaśca vo namo

नमः सेनाभ्यः सेनानिभ्यश्च वो नमो

namaḥ senābhyaḥ senānibhyaśca vo namo

नमः , क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो

namaḥ kṣattṛbhyaḥ saṅgrahītṛbhyaśca vo namo

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो

namastakṣabhyo rathakārebhyaśca vo namo

नमः कुलालेभ्यः कर्मारेभ्यश्च वो  नमो

namaḥ kulālebhyaḥ karmārebhyaśca vo  namo

नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो  नमो

namaḥ puñjiṣṭebhyo niṣādebhyaśca vo  namo

नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो  नमो

nama iṣukṛudbhyo dhanvakṛadbhyaśca vo  namo

नमो मृगयुभ्यः श्वनिभ्यश्च वो नमो

namo mṛgayubhyaḥ śvanibhyaśca vo namo

नमः श्वभ्यः श्वपतिभ्यश्च वो नमः ॥४॥

namaḥ śvabhyaḥ śvapatibhyaśca vo namaḥ ||4||